# संस्कृतवार्ता:

दिनाङ्क : 22.09.25 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अरुणाचलप्रदेशे एकपंचाशत् शत कोटिरूप्यकाणां अनेकाः विकासपरियोजनाः प्रारब्धवान्। प्रधानमन्त्रिणा उक्तं यत् अरुणाचलप्रदेशः न केवलं उदीययमानस्य सूर्यस्य भूमिः अपितु देशभक्तेरपि अस्ति।
- प्रधानमन्त्री नवरात्रौ क्रियान्वितस्य नूतनस्य वस्तुसेवा कर - जीएसटी-दरेण सः इमं जीएसटी वस्तुसेवा कर-बचत-महोत्सवः इति आह्वयत्।
- विदेश-मन्त्री एस. जयशंकरः अद्य न्यूयॉर्के अशीति- तमे संयुक्त-राष्ट्र-महासभायाम् अभिभाषिष्यते।
- इजरायल-देशीय प्रधानमन्त्रिणा बेन्जामिन-नेतन्याहू वर्येण ब्रिटेन-कनाडा-ऑस्ट्रेलिया देशानाम् उपरि आतंकवाद-वर्धनस्य आरोपः आरोपित:।

-----------------------------------

<u>प्रधानमन्त्री - अरुणाचलप्रदेशे</u>

प्रधानमन्त्री नरेन्द्रमोदी अरुणाचलप्रदेशे एकपंचाशत् शत कोटिरूप्यकाणां अनेकाः विकासपरियोजनाः प्रारब्धवान्।

प्रधानमन्त्री नरेन्द्रमोदी अद्य अरुणाचलप्रदेशे एकपंचाशत् शत कोटिरूप्यकाणां आधारभूतसंरचनापरियोजनानां प्रारम्भं कृतवान्, यया ऊर्जायां क्षेत्रीयविकासे च राज्यस्य वर्धमाना भूमिका प्रकाशिता। प्रधानमन्त्रिणा मोदिना वस्तुतः शियोमी-मण्डले द्वयोः प्रमुखयोः जलविद्युत्परियोजनयोः, तवाङ्गनगरे च सम्मेलनकेन्द्रस्य आधारशिला स्थापिता। प्रधानमन्त्रिणा मार्गसंपर्कः, स्वास्थ्यसेवा, अग्निसुरक्षा च इत्यादिषु विभिन्नक्षेत्रेषु नवत्याधिक द्वादशशत कोटिरूप्यकाणां परियोजनानां उद्घाटनं अपि कृतम् ।

पश्चात् इटानगरस्य इन्दिरागान्धी उद्याने जनसभां सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् अरुणाचलप्रदेशः न केवलं उदीययमानस्य सूर्यस्य भूमिः अपितु देशभक्तेरपि अस्ति। सः अवदत् यत् केसरवर्णः यथा त्रिवर्णस्य प्रथम: वर्णः, तथैव अरुणाचलप्रदेश: प्रथमवर्णः अस्ति। अत्र प्रत्येकं जनः शौर्यस्य सरलतायाश्च मूर्तरूपं ददाति। अद्य पश्चात् प्रधानमन्त्री नरेन्द्रमोदी त्रिपुरादेशस्य उदयपुरनगरे हिन्दुभिः पूजितेषु एकपंचाशत् शक्तिपीठेषु अन्यतमस्य पुनर्विकसितस्य मातात्रिपुरासुन्दरीमन्दिरस्य उद्घाटनं कृतवान्।

प्रधानमन्त्रिणा उक्तं यत्, "अस्मिन् वर्षे नवरात्रि-उत्सवः वस्तु सेवा - कर -महोत्सवात् आरभ्यते इति अतीव विशेषः अस्ति।"

सः अवदत् यत् अस्मिन् वर्षे नवरात्रि-उत्सवः जीएसटी-बचत-महोत्सवेन आरभ्यते इति कारणतः अतीव विशेषः अस्ति ।

अग्रिम-परम्परायाः वस्तु- सेवाकर - विषये प्रधानमन्त्रिणा उक्तं यत् अस्य परिष्कारेण बृहत्तम-संख्यायाम् लाभार्थिन्यः महिलाः अपि अन्यतमाः भविष्यन्ति । सः व्याख्यातवान् यत् एतेषां परिष्काराणाम् कृते मासिकगृहव्यये न्यूनता भविष्यति, सुरक्षायां वृद्धिः च भविष्यति।

**बाइट-पीएम-पावर प्रोजक्ट-32 से.**

------------------------------------

<u>**प्रधानमन्त्री नवरात्रम्**</u>

अद्यैव नवरात्रिपर्व आरब्धम्। अस्मिन् अवसरे प्रधानमन्त्री मोदी देशवासिनां कृते शुभकामनाम् अयच्छत्, स्वदेशीयविषये ध्यानं दातुं च परामर्शम् दत्तवान्। नवरात्रौ क्रियान्वितस्य नूतनस्य वस्तुसेवा कर - जीएसटी-दरेण सः इमं जीएसटी वस्तुसेवा कर-बचत-महोत्सवः इति आह्वयत्। येन बहूनि वस्तूनि न्यूनमूल्ये अभवन् ।

प्रधानमन्त्री मोदी सामाजिकमाध्यमेन शुभकामनाम् अयच्छत्। पण्डित जसराजस्य भजनं अपि स्मरणं कृतवान् ।

------------------------------------

विदेश- जयशंकरः

विदेश-मन्त्री एस. जयशंकरः अद्य न्यूयॉर्के संयुक्त-राष्ट्र-महासभायाः एकस्मिन् सत्रे भागं गृहीष्यति । ततः अमेरिकीय विदेश मन्त्रिणा मार्के रुबियो वर्येण सह मेलनमपि विधास्यति । विदेश-मन्त्री एस. जयशंकरः न्यूयॉर्के अशीति- तमे संयुक्त-राष्ट्र-महासभायां अभिभाषिष्यते।

------------------------------------

वैष्णव-जीएसटी

आगामिनी परम्परायाः जीएसटी परिष्कारः अद्य प्रभृति प्रभाविभूताः। सूचना-प्रसारण-मन्त्रिणा अश्विनी वैष्णवेन भारतीय जनता-पार्टीति दलीय - मुख्यालये GST परिष्काराणां विषये सञ्जाते वार्ताहर-सम्मेलने अभिभाषितम् एतेन अर्थव्यवस्था अपि सुदृढा भविष्यति इत्यपि प्रधानमन्त्रिणा नरेन्दर्मोदिना भणितम्। वैष्णवेन उक्तं यत् भारतीय - उत्पादाः दैन्दिन-व्यवहारे बहु-लाभप्रदाः भविष्यति। एषा सूचना बहु-प्रसन्नता-युतावर्तते।

------------------------------------

इजरालय-प्रधानमन्त्री

इजरायल-देशीय प्रधानमन्त्रिणा बेन्जामिन-नेतन्याहू वर्येण ब्रिटेन-कनाडा-ऑस्ट्रेलिया देशानाम् उपरि आतंकवाद-वर्धनस्य आरोपः आरोपितः।

------------------------------------

उपराष्ट्रपति

उपराष्ट्रपतिना सी.पी. राधाकृष्णन् इत्यनेन अद्य प्रातः नवदिल्ल्यां प्रकाशित- प्रधानमन्त्रिणः नरेन्द्रमोदिनः भाषणेषु समाधारि-तानि चत्वारि पुस्तकानि " सबका साथ सबका विकास -सबका विश्वास -सबका प्रयास" एतेषां विमोचनं कृतम्।

------------------------------------

पी.के. मिश्रा

व्हाइट नाइट कोर इत्यस्य जनरल् आफिसर कमाण्डिंग् (जीओसी) लेफ्टिनेंट जनरल् इतिपदाधिकारी पी.के. मिश्रा, जम्मू-कश्मीरे आतंकवाद-विरोधि कार्याणां समीक्षाम् कृतवान्।

जम्मू-कश्मीर में लेफ्टिनेंट जनरल इति पी.के. व्हाइट् नाइट् कोरइत्यस्य जनरल् आफिसर कमाण्डिंग् (जीओसी) मिश्रा अद्य उधमपुर, डोडा, किश्तवार् जनपदेषु पर्वतीयक्षेत्रेषु आतङ्कवादिभिः सह सद्यः एव सम्मुखीकरणस्य अनन्तरं प्रचलितानां आतङ्कवादविरोधीकार्यक्रमाणाम् समीक्षां कृतवान्। उधमपुरमण्डलस्य दुडु-बसन्तगढं डोडामण्डलस्य भदेरवाहेन सह सम्बद्धं सियोजधरवने शुक्रवासरे सायं कालात् आतङ्कवादिभिः सह संघर्षे एकस्य सैनिकस्य वीरगते: अनन्तरं विशालः अन्वेषणकार्यक्रमः प्रचलति।

------------------------------------

## त्रिपुरा-प्रधानमन्त्रिणा

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य प्रसादयोजनान्तर्गतं माता–त्रिपुरासुन्दरी–मन्दिरस्य विकासकार्याणाम् उद्घाटानं विहितम् । अनेन उद्घाटनेन त्रिपुरायाः समृद्ध-सांस्कृतिक-न्यासे आध्यात्मिक–परम्परायाश्च नूतनः कश्चन अध्यायः सम्मिलितः। अरुणाचलप्रदेशात् अगरतालायाः एमबीबी-विमानपत्तनं सम्प्राप्य प्रधानमन्त्रिणा उदग्रयानेन अगरतलातः उदयपुरस्य ओटीपीसी-उदग्रयान-स्थानकं यावत् यात्रा कृता । अत्रावसरे प्रधानमन्त्रिणः दर्शनाय प्रतीक्षमाणाः जनाः तस्य सस्नेहं स्वागतं कृतवन्तः । तत्र तावत् प्रधानमन्त्रिणा पूजाऽर्चना विहिता सहैव प्राचीनमन्दिरेषु स्थापितानां प्रदर्शनीनाम् अपि अवलोकनं कृतम्। एताः प्रदर्शिन्यः तत्रत्यं सांस्कृतिक–आध्यात्मिक–वैभवं प्रकाशयन्ति। पारम्परिक-सम्मानत्वेन जमातिया–होड़ा–समुदायस्य कलाप्रवीणाः भक्तिगीतैः तस्य स्वागतं अकुर्वन् , येन उत्सवस्य भव्यता इतोऽपि सम्वर्धिता।

------------------------------------

## जोशी-सम्मेलनम्

केन्द्रीय-नवीन-अक्षय-ऊर्जा-मन्त्री प्रल्हाद-जोशी-वर्यः अद्य अवदत् यत् ऊर्जा-भाण्डारणयुगस्य नेतृत्वं सर्वस्मिन्नपि विश्वे भारतं करिष्यतीति। श्री जोशी वर्यः नवदेहल्यां ऊर्जा-सञ्चयः-स्वच्छ-ऊर्जा-परिवर्तनस्य चालनं इति विषयकं सम्मेलनं सम्बोधयन् एतत् उक्तवान्। सः अवदत् यत् स्वच्छं सुस्थिरं च भविष्यं प्रति राष्ट्रस्य यात्रां सर्वेषाम् सहभागिनां सामूहिकप्रयासेण साधयितुं शक्यते इति। श्री जोशी वर्यः अवदत् यत् सोडियं-अयान्-ब्याटरि इत्यादीनि नूतनानि तन्त्रज्ञानानि विपण्यां महत्त्वपूर्णां रुचिं प्राप्नुवन्ति। श्रीजोशी वर्यः अवदत् यत् आगामिषु पञ्चवर्षेषु भारते सार्धद्विशतप्रायः गीगावाट् पुनर्नवीकरणीय-ऊर्जायाः उत्पादनस्य लक्ष्यम् अस्ति इति। भारतं अस्य शताब्दस्य त्रिंशत्तमवर्षपर्यन्तं पञ्चशत-गीगावाट् इति अक्षय-ऊर्जायाः उत्पादनं लक्ष्यीकरोति।

॥ इति वार्ता: ।।